तर्कसंग्रहस्य न्यायबोधिनीटीका पत्राणि
१–१८
पू.

श्रीराम

॥७॥ न्यायबोधनी ॥७॥

1

न्या०
बो० १

श्रीमते रामानुजाय नमः अखिलागमतत्त्वज्ञं श्रीकृष्णाख्यं परं गुरुम् । ध्यात्वा गोवर्द्धनसुधीस्त
नुते न्यायबोधिनीम् १ चिकीर्षितस्य ग्रंथस्य निर्विघ्नपरिसमाप्त्यर्थं इष्टदेवतानमस्का
रात्मकं मंगलं शिष्यशिक्षार्थं ग्रंथतो निबध्नाति निधायेति अथ द्रव्येति अत्र स
प्तग्रहणम् पदार्थत्वं द्रव्याद्यन्यतमत्वव्याप्यमिति व्याप्तिलाभाय ननु शक्तिप
दार्थस्याष्टमस्य सत्त्वात् कथं सप्तैवेति तथा हि वह्न्यादिसंयुक्ते धान्यादौ सत्यपि
मणिसंयोगे दाहो न जायते तच्छून्ये न तु जायते अतो मणिसमवधाने न
शक्तिर्नश्यते मण्यभावदशायां दाहानुकूलशक्तिरुत्पद्यत इति कल्प्यते तस्मात् शक्ति
रतिरिक्तः पदार्थ इति चेन्न मणेः प्रतिबंधकत्वेन तदभावस्य कारणत्वेनैव निर्वाहे मण्यस
मवधानासमवधानाभ्यां अनंतशक्तितद्ध्वंसकल्पनायाः अन्याय्यत्वात् तस्मात् स
प्तैवेति सिद्धं ॥ पदार्थान्विभजते द्रव्येति द्रव्याणि विभजते पृथिवीति ननु अंधकार स्यः
दशमद्रव्यस्य सत्त्वात् कथं नवैवेति तथा हि नीलं तमश्चलतीति प्रतीते नीलरूपाश्र ग्रा
यत्वेन क्रियाश्रयत्वेन च द्रव्यत्वं तावत् सिद्धं तच्च न नवद्रव्येषु त अंतर्भावसंभवात्

दे

न्या॰नि॰ २ स्पर्शवत्वं लक्षणं विशेषणांशानुपादाने स्पर्शवत्त्वमात्रस्य लक्षणत्वे पृथिव्यादि विशे
केऽतिव्याप्तिः स्यादतः पूर्वविशेषणोपादानं तावन्मात्रोपादाने आकाशादावतिव्या
प्तिस्तत्रापि रूपरहितत्वस्य सत्वात् अतउक्तं स्पर्शवत्वेति अतिव्याप्तिर्नाम ॥ अलक्ष्ये
लक्षणसत्वं यथा गोः शृंगित्वं ॥ लक्षणं कृतं चेत् ॥ लक्ष्यभूतगोभिन्ने ॥ महिषावति
व्याप्तिः ॥ तत्रापि शृंगित्वस्य विद्यमानत्वात् ॥ अव्याप्तिर्नाम ॥ लक्ष्यैकदेशावृत्ति
त्वं यथा गोर्नीलरूपवत्वं कृतं चेत् ॥ लक्ष्यैकदेशे नाना ॥ लक्ष्यतावच्छेदकाश्रयी
भूते क्वचित् लक्षणस्याभाव असत्वमेवाव्याप्तिरित्यर्थः ॥ श्वेतगवि नी
लरूपवत्वस्य लक्षणस्य असत्वात् ॥ असंभवो नाम ॥ लक्ष्यमात्रे कुत्रापि
लक्षणासत्वम् ॥ यथा गोरेकशफत्वं ॥ गोमात्रस्य द्विशफत्वेन एकशफत्व
स्य कुत्राप्यसत्वात् ॥ अतिव्याप्त्यव्याप्त्यसंभवानां निष्कृष्टलक्षणं तु ॥ लक्ष्यता
वच्छेदकानधिकरणे [illegible] ॥ असंभवस्तु ॥ लक्ष्यतावच्छेदकव्यापकीभूता
भाव३ यर भाव प्रतियोगित्वम् ॥ आकाशलक्षणमिति ॥ शब्दगुणकमिति ॥ शब्दगुणपदं ॥ आकाशे श
ब्दएव ॥ विशेषगुण ॥ नत्वतिव्याप्तिवारणाय ॥ समन्वयेन ॥ शब्दत्वमात्र
॥ तदुक्तम् रूपगंधरसस्पर्शव्याप्तिर्ईसांसिद्धिको द्रवः ॥ बुद्ध्यादिभावनांताश्च राम
प्रतियोगितावच्छेदकसामानाधिकरण्यं अतिव्याप्तिः लक्ष्यतावच्छेदकसमानाधिकरणात्यन्ताभावप्रतियो २
गित्वमव्याप्तिः

2

कुतो दशमद्रव्यत्वमिति वाच्यम् आकाशादिपंचकस्य नीरूपत्वात् वायोरपि नीरूपत्वा
त् न तेष्वंतर्भावः तमसो निर्गंधत्वात् पृथिव्याः गंधवत्वात् न पृथिव्यामंतर्भावः संभ
१३ वति जलतेजसोः शीतोष्णस्पर्शवत्वात्तमसो निस्पर्शत्वान्न तयोरंतर्भावः तस्मात्तमसो
दशमद्रव्यत्वं सिद्धमिति चेन्न तेजसो ऽभावेनैवोपपत्तौ अतिरिक्तकल्पनायां मान
भावात् न च विनिगमनाविरहात् तेजएवांधकाराभावरूपमस्त्विति वाच्यम् तेजसो
भावरूपत्वे सर्वानुभवं सिद्धोष्णस्पर्शस्याश्रयीभूतद्रव्यांतरकल्पने गौर
वात् तस्मादुष्णस्पर्शगुणाश्रयत्वं तेजसो द्रव्यत्वं सिद्धम् तेषु नीलादिप्रतीतिस्तु भ्रांतिरेवेदी
२५ पापसरणक्रियापारावतभ्रमानात् गंधवतीति गंधवत्वम् पृथिव्या लक्षणं ननु पृथिवीष्ठ
पृथिवीत्वं सत्तावच्छेदकं पदार्थोऽवच्छिन्नत्वलक्षणं तद्धर्मत्वं सत्तावच्छेदकं पदार्थोपर्यसं नुव
च्छेदकः स तद्धर्मोऽवच्छिन्नत्वाच्चल सत्तावच्छेदकं पृथिवीत्वं सत्ता पृथिवीत्वावच्छि
न्नारविंद शीतस्पर्शवत्वादिलक्षणे जलादी तेन लक्षणे जलत्वादि तेन लक्षणं तदवच्छेदकत्वं व३
च बोध्यं एवं पृथिव्यादित्रिकं निरूप्य वायुं निरूपयति रूपरहितेति ॥:०:॥ रूपरहि
तत्वे सति स्पर्शवत्वं वायोर्लक्षणं सतिसप्तम्या विशिष्टार्थकतया रूपरहितत्वविशि

न्या॰
२ नी॰

सति चक्षुर्ग्राह्यत्वे ॥ मात्रपदानुपादाने ॥ संख्यादिसामान्यगुणेतिव्याप्तिः संख्यादावपि चक्षुर्ग्राह्य
त्वविशिष्टगुणसत्वात् अतस्तत्रातिव्याप्तिवारणाय मात्रपदं संख्यादेस्तु चक्षुरिन्द्रियग्राह्यत्वात् च
क्षुर्मात्रग्राह्यरूपविशिष्टत्वेन नास्ति ॥ अत्र ग्राह्यत्वं नाम प्रत्यक्षविषयत्वं ग्राह्यत्वं नाम प्रत्यक्ष
विषयत्वम् ॥ चक्षुर्भिन्नेन्द्रियजन्यप्रमाया अविषयत्वे सति ॥ चक्षुर्जन्यो यो लौकिकप्रत्यक्ष तद्विषयत
मिति फलितार्थः ननु प्रभायां संयोगे रूपत्वव्याप्यजातिव्याप्तिः तस्य चक्षुर्मात्रग्राह्यत्वविशि
ष्टगुणाद्यभावादिति चेन्न गुणपदस्य विशेषगुणपरत्वात् नचैवं विशेषगुणघटितत्वे दशायां
स्पर्शादावतिव्याप्तमात्र मात्रपदे पर्यवसितार्थस्तु जलमात्रवृत्तिसांसिद्धिकद्रवत्वादावति
व्याप्तिवारणाय तदनुपादानात् अथवा चक्षुर्मात्रग्राह्यजातिमद्गुणत्वस्य लक्षणत्वात् नच प्रभाघ
टसंयोगादावतिव्याप्तिः संयोगत्वजातेः [illegible] त्वगिन्द्रियग्राह्यत्वात् अत्र जाति
घटितलक्षणे गुणत्वानुपादाने चक्षुर्मात्रग्राह्यसुवर्णत्वादिजातिमति सुवर्णादावतिव्याप्तिः अ
तस्तद्वारणाय तदुपादाने एवं रसादिलक्षणेऽपि विशेषणानुपादाने रूपभिन्नगुणादावतिव्याप्ति
विशेष्यानुपादाने च समवायेतरसत्तादावतिव्याप्तिः तेन विशेषणविशेष्ययोरुपा
दाने स्पर्शवत्पतितवर्गादिके ति अत्रापि मात्रपदं संख्यादिसामान्यगुणादावतिव्याप्तिवारणाय प्र

प्र
२

...ने । कत्वमानानावादित्यर्थः विभिन्नेति सर्वेम् तद्व्यसंयोगित्वं विभुत्वं मूर्त्तत्वं च क्रियाश्रयत्वं ॥ पृथिव्य
प्तेजोवायुमनांसि मूर्त्तानि ॥ पृथिव्यप्तेजोवाय्वाकाशपंचकं भूतपदवाच्यम् भूतत्वं नाम ।
वहिरिंद्रियग्राह्यविशेषगुणवत्त्वं ॥ कालं लक्षयति ॥ अतीतेति ॥ व्यवहारहेतुत्वस्य दिशो ।
कू॰ ...त्र रामाह ॥ प्राचीति उदयाचलसंन्निहिताया दिसा प्राचि अस्ताचलसंन्निहितायादिकुसा ।
प्रतीचि ॥ मेरोस्संन्निहितायादिकुसानुदीची मेरुव्यवहितायादिकुसादक्षिणा ॥ आत्मानं निरूप
पदे६ यति ज्ञानाधिकरणमिति अधिकरणं ... वयिन्द्रियान्तरमात्मलक्षणमावश्यं ॥ मनो निरूपयति ॥ सुखा
दीति उपलब्धिसाधनम् सुखसाक्षात्कारः तथा च मनसि साक्षात्कारत्वे सति इन्द्रियत्वं मनसो लक्षणं ।
कार ५ दि इन्द्रियत्वमात्रोक्तौ चक्षुरादावतिव्याप्तिः अतः सुखसाक्षात्कारकारणत्वम् विशेष्यानुपादा
नेऽत्मन्यतिव्याप्तिः आत्मनः ज्ञानादिकं प्रति समवायिकारणत्वात् अतः इन्द्रियत्वस्य
विशेष्योपादाने रूपं लक्षयति चक्षुर्मात्रेति चक्षुर्मात्रग्राह्यत्वविशिष्टगुणत्वं रूपस्य लक्ष
णं विशेष्य... मात्रोपादाने संख्यादावतिव्याप्तिः अतः चक्षुर्मात्रग्राह्यत्वविशेषणं ग्राह्य
मात्रोपादाने रूपत्वादावतिव्याप्तिः अतो गुणोपादानं ... तनिराजातिरूपितं इन्द्रिय
ग्राह्या अतः ... विशेष्योपादाने चक्षुर्मात्रग्राह्यत्वनाम चक्षुरिन्द्रियग्राह्यत्वे

तन्यकुंठी ४ गा सर्वं रूपादि च नष्टं एवं नाशे तदनंतरं दुग्धे पाकजरूपादिकं तदनंतरं ताहशरूपरसग
धस्पर्शजनकाः तेजस्संयोगाजायंते तदुत्तरं तैरेव ताहशरूपरसादयै[illegible]त्पद्यंते ताहश
रूपादिविशिष्टपरमाणुभिः दुग्धद्व्यणुकमारभ्यते ततस्त्र्यणुकादिक्रमेण दुग्धा
रंभइति एवं दुग्धारंभके परमाणुभिरेव दध्यारभ्यते पाकमहिम्ना एवं दध्यारंभकैः
परमाणुभिः नवनीतमारभ्यत इति किं विभागं लक्षयति संयोगनाशकत्वविशिष्ट
५ गुणत्वं विभागस्य लक्षणं विशेषणमात्रोपादाने क्रियायामपि संयोगनाशकत्वान्नत्वानिष्ठा दि५
तिवारणाय गुणत्वाविशेषणं गुरुत्वं लक्षयति आद्येति द्वितीयादिपतनक्रियायां वेगस्यैवा
समवायिकारणत्वात् तत्रातिव्याप्तिवारणाय आद्येति उत्क्षेपणे आद्यविशेषणमपि व्य
र्थं वद्वयोजनीयं स्नेहं लक्षयति चूर्णादीति चूर्णादिपिंडीभावहेतुत्वे सति गुणत्वं स्नेहस्य
लक्षणं पिंडीभावो नाम चूर्णादिधारणाकर्षणहेतुस्ततो विलक्षणसंयोगः ताहशसंयोगे स्नेहस्यैवा
ऽसाधारणकारणत्वा[illegible] ननु जलादिगतद्रवत्वस्य तथा सति दुग्धद्रवत्वादिसंयोगे चूर्णादेः पिंडी राम
भावापत्तेः अतस्तस्यैव तत्रासाधारणकारणं विशेषणमात्रोपादाने कालादावतिव्याप्तिस्त ४

अन्यद्धि शेषमाक्तस्य पर्ववदोध्यं गन्तारुत्वपदार्थोपि पूर्ववदेवप्रत्यक्षविषयत्वरू
पएव बोध्य रूपादिचतुष्टयं सर्वं पाकजमिति एतत्तत्वनिर्णीयप्रक्रियाया
कोनामविजातीयतेजःसंयोगः स च नानाजातीयः रूपजनको विजातीयः
तेजःसंयोगः तद्व्यतिरेकपारसजनकोविजातीयः एवं गंधजनकोपिविजातीयः
एवस्पर्शजनकोपिविजातीयः एवंप्रकारेण भिन्नाभिन्नजातीयाः पाकाः वैलक्षण्येन
कल्पनीयाः यथारण्यपुजनिद्रित्र वह्न्यादोऽस्मल लक्षणविजातियतेजःसंयोग
तस्यपरैर रित रूपनाशेन रूपान्तरस्यापि ना द्वेरूपाशिःनतुरसादेरूप्या तैः एवंरस
स्पर्श ... स्यैवानुभवात् एवं गंधनाशेन विजातीयपाकवशात् सुरभिःगंधोप
... स्यैवानुभवात् एवं स्पर्शोपिपाकवैसौत्रकोविनस्पर्श
लक्षे गंधजनकोपिविलक्षण एवांगीकार्यः एवंस्पर्शेपिपाकवैसौत्रकोविनस्पर्श
नाशेनमद्रुस्पर्शानुभवात् तस्माद्रूपादिजनकाविजातीया एवमपाकापेम
न्नेषापरमाणुनामेकजातीयत्वेपिपाकमहिम्नाविजातीयद्व्यान्तरानुभवः यथा
गोमृत्तिकारणादीनांघटादीनामारंभकपरमाणुषुविजातीयतेजःसंयो

तस्माद्रसजनक
कोविजातीयः
एवंदृष्टे एवं
रूपसत्वेपिवि
लक्षणपाकव
शाद्रसान्तरो
त्पत्तेः रसजन
कोपिविजातीय एवं

गो

स्पर्शजनकोपिविलक्षणाएवांगीकार्यः ५३

मनंतह्राणुकभङ्गे १

श्लिरत्नसंवादरणायाविशेषणविशेष्यत्वेन तत्त्वोहृदयोरुभयोरप्यादानं अनुभवे विभ्रजते सद्विविवि

धशतेयथार्थानुभवेऽसत्त्वापत्तिरिति चेतोन्न हृतीत्यत्र समन्यार्यो विशेष्यत्वेन तत्त्वो हे न प्रका

रीभूतधर्मोध्यर्तव्यः तथा रजतहृद्विशेष्यकत्वे सति तत्प्रकारकानुभवत्वं यथार्थानुभव

त्वलक्षणं तदाहरणं रजते इदं रजतमिति ज्ञानं रजतत्वावच्छिन्नविशेष्यकत्वे सति रजतत्वप्र

5 कारकं तद्दृद्विशेष्यतानिरूपितत्वनिष्ठप्रकारताशालित्वमिति निष्कर्षः अयथार्थ

यास्तु ते रंगरजतयोरिमे रजतरंगे इत्याकारकसमूहालम्बनभ्रमे अतिव्याप्तिः तत्राधि

रजतत्वावच्छिन्नविशेष्यकत्वरजतत्वप्रकारकत्वयोः रंगत्वावच्छिन्नविशेष्यकत्वरंगत्वप्रकारक

त्वयोश्च सत्त्वात् उक्तनिष्कर्षे तु रजतत्वप्रकारतायाः रजतत्वावच्छिन्नविशेष्यतानिरूपित

त्वाभावात् रंगत्वप्रकारतायाः रंगत्वावच्छिन्नविशेष्यतानिरूपितत्वाभावात् किन्तु समूहालम्बन

भ्रमस्य रंगांशे रजतत्वावगाहित्वेन रजतांशे रंगत्वावगाहित्वेन च रजतत्वप्रकारतायाः रं

गत्वावच्छिन्नविशेष्यतानिरूपितत्वात् एवं रंगत्वप्रकारतायाः रजतत्वावच्छिन्नविशेष्यतानिरूपित

त्वात् न तत्रातिव्याप्तिरिति अयथार्थानुभवेऽव्याप्तिर्न भवतीति अत्रापि पूर्ववत् द॰ ९

भा

करणायविशेष्योपादाने वस्तुतस्तु जलत्वसंयोगस्यैव पिंडीभावहेतुत्वं स्नेहस्य पिंडीभावहेतुत्वे
मानाभावात् जले द्रवत्वविशेषणानर्थक्यादिव्याहृतिः शब्दं लक्षयति श्रोत्रग्राह्येति शब्द
त्वेऽतिव्याप्तिवारणाय गुणपदं रूपादावतिव्याप्तिवारणाय श्रोत्रेति सत्रिविधः संयोगजो
विभागजः शब्दजश्चेति भेरीदंडसंयोगजन्यो भेर्यांकाशादिशब्दो हस्ताभिघातसंयोगजन्यो मृ
दंगादिशब्दः वंशे पाट्यमाने दलद्वये विभागजन्यं चटचटाशब्दः शब्दान्यतिरिक्तः आरम्भका
णां बुद्धेर्लक्षणमाह सर्वव्यवहारेति व्यवहारो नाम शब्दप्रयोगः ज्ञानं विना शब्दप्रयोगासं
भवात् शब्दप्रयोगस्य व्यवहारहेतुत्वं ज्ञानस्य लक्षणं बुद्धिं विभजते स्मृतिरनुभवश्चेति स्मृ
तिं लक्षयति संस्कारेति संस्कारजन्यत्वविशिष्टज्ञानत्वं स्मृतेर्लक्षणं विशेषणानुपादा
ने प्रत्यभिज्ञादावतिव्याप्तिस्तद्वारणाय विशेषणोपादाने संस्कारध्वंसेऽतिव्याप्तिवारणाय वि
शेष्योपादाने ध्वंसं प्रति प्रतियोगिनः कारणत्वात् संस्कारध्वंसेऽपि संस्कारजन्यत्वस्य सत्वात्
अनुभवं लक्षयति तद्भिन्नमिति स्मृतिभिन्नमित्यर्थः स्मृतिभिन्नत्वविशिष्टज्ञानत्वं अनुभ
वस्य लक्षणं विशेषणानुपादाने स्मृतावतिव्याप्तिः विशेष्यानुपादाने घटादावतिव्या

कारणं साधारणत्वं च कार्यत्वावच्छिन्नकार्यतानिरूपितकारणताशालित्वं ईश्वर
दृष्टादेः कार्यत्वावच्छिन्नं प्रत्येव कारणत्वात् असाधारणकारणत्वं कारणं लक्षयति का
र्यनियतेति कार्यपूर्ववृत्तिनियतत्वे सति पूर्ववृत्तित्वं नियतत्वविशेषणानुपादाने पू
र्ववृत्तिनो रासभादेरपि घटादिकारणत्वं स्यात् अतो नियतत्वे सतीति विशेषणं नि
यतपूर्ववृत्तिनो दण्डरूपादेरपि घटकारणत्वं स्यात् अतोऽनन्यथासिद्धपदं त
6 पि कारणलक्षणे निवेशनीयं दण्डरूपादीनां अन्यथासिद्धत्वात् कार्यं लक्षयति
कार्यमिति प्रागभावप्रतियोगित्वं कार्यस्य लक्षणं कार्यमुत्पत्तेः पूर्वं इह घटो भविष्य
तीति प्रतीतिर्जायते एतत्प्रतीतिविषयोऽभावः प्रागभावः तत्प्रतियोगी घटादिरू
पकार्यं कार्यं कारणं त्रिविधमिति समवायिकारणमसमवायिकारणं निमित्तकारण
मिति समवायिकारणं लक्षयति यत्समवेतमिति यस्मिन् समवेतं सत् समवायसंब
न्धेन संबद्धं सत् कार्यमुत्पद्यते तत् समवायिकारणमित्यर्थः उदाहरणं यथा तन्तवः इ
ति तन्तुषु समवायेन संबद्धः सन् पटात्मककार्यमुत्पद्यते इति तन्तवः पटस्य समवा
यिकारणमित्यर्थः सामान्यलक्षणं तु समवायसंबन्धावच्छिन्नकार्यतानिरूपितकारणताश्रय ६

भाववद्विशेष्यतानिरूपिततन्निष्ठप्रकारताशालिज्ञानत्वं विवक्षितं अन्यथा र
जतरंगयोः इमे रजतरंगे इत्याकारकसमूहालंबनप्रमायामतिव्याप्तिः एतत्सम
हालंबनस्य रजतरंगोभयविशेष्यकत्वेन रजतत्वरंगत्वोभयप्रकारकत्वेप्यस
त्वात् निष्कर्षे तु रजतांशे रजतत्वावगाहित्वेन रंगांशे रंगत्वावगाहित्वेन च रजत
त्वप्रकारतायाः रजतत्वाभाववद्रंगविशेष्यतानिरूपितत्वाभावात् एवं रंगत्वप्र
कारतायाः रंगत्वाभाववद्रजतविशेष्यतानिरूपितत्वाभावश्च नातिव्याप्तिः तदह
णं यथाप्रमात्वावच्छिन्नयथार्थानुभवं विभजते चतुर्विध इति तत्करणमिति फली
भूतप्रत्यक्षादिकरणं चतुर्विधमित्यर्थः प्रत्यक्षादिचतुर्विधप्रमाणानां च प्रमाक
रणत्वसामान्यलक्षणं वक्ष्यते प्रत्यक्षज्ञानकरणमित्यादिना करणलक्षणमाह असाधार
णमिति व्यापारवदसाधारणं कारणं करणमित्यर्थः असाधारणत्वं च कार्यत्वा
तिरिक्तधर्मावच्छिन्नकार्यतानिरूपितकारणताशालित्वं यथा दण्डो घटं प्रति का
रणं कार्यत्वातिरिक्तघटत्वादिरूपावच्छिन्नकार्यता घटे तन्निरूपिता
कारणता दण्डे अतो घटं प्रति दण्डोऽसाधारणं कारणं भ्रम्यादिरूपव्यापारवत्त्वाच्च

णेन सह घटस्य समवायिकारणम् तत्पटेन सह एकस्मिन्नर्थे तंतुरूपार्थे समवे
तं समवायसंबंधेन वर्त्तमानत्वात् तंतुरूपं पटरूपं प्रति कारणं भवति अतो समवा
यिकारणं तंतुरूपं पटरूपे सामान्यलक्षणे तु स्वाश्रयसंबंधाऽवच्छिन्नकार्यतानि
रूपितसमवायस्वसमवायिसमवेतत्वाऽन्यतरसंबंधाऽवच्छिन्नकारणताश्रय
त्वे समवायसंबंधावच्छिन्नकपालत्वसंयोगविशिष्टकारणताकःपालद्वयसंयोगवत्ते
7 त्वे एतन्मात्रस्यैव न क्रियायामाद्यपतनक्रियायां च गुरुत्वद्रवत्वे वा समवायिकारणे
भवतः आद्यपतनक्रियायां आद्यस्यंदनक्रियायां समवायसंबंधेन तयोः कारणत्वा
त् अवयविगुणे हेतु अवयवगुणादेः स्वसमवायिसमवेतत्वसंबंधेन कारण
त्वेन तत्संबंधावच्छिन्नकारणताश्रयत्वं अवयवगुणादौ वर्त्तते स्वपदं ग्राह्यकपाल
रूपं तंतुरूपसमवायिकपालतंतुसमवेतत्वसंबंधेन घटपटादौ कपालरूपतंतुरूपयोः
सत्वात् तदुभयभिन्नमिति समवायिअसमवायिभिन्नकारणमित्यर्थः तदेतोदतिप
द्रसाधारणमिति व्यापारवत्वे सति इत्यपि पूरणीयं अन्यथा तंतुकपालसंयोगादा ७
वति व्याप्तिः कपालतंतुसंयोगयोरपि कार्यत्वातिरिक्तवत्त्वाऽवच्छिन्नप्रतिकारण

संबंधावच्छिन्नकारणत्वं समवायिकारणत्वमिति समवायसंबंधेन कार्यस्तस्य
घटादेः कारणे कपालादौ कपालादस्तात्म्यसंबंधेनैव सत्त्वात् समवायसंबंधाव
च्छिन्नघटत्वावच्छिन्नकार्यतानिरूपिततादात्म्यसंबंधावच्छिन्नकारणतायाः कपा
लादौ सत्वान्न तत्समन्वयः जन्यभावत्वावच्छिन्नं प्रति तादात्म्यसंबंधेन द्रव्यस्य
कारणत्वात् जन्यभावेषु द्रव्यगुणकर्मसु द्रव्यमेव समवायिकारणमित्याशयेना
ह पटस्य स्वगततन्त्वादिरिति समवायिकारणमित्यनुषज्यते असमवायिकारणं ल
क्षयति कार्येणेति कार्येण सह एकस्मिन्नर्थे समवेतं यत्कारणं तदसमवायिकार
णमित्यन्वयः कारणेन सह एकस्मिन्नर्थे समवेतं यत्कारणं तदसमवायिकारण
मित्यन्वयः जन्यद्रव्यमात्रे अवयवसंयोगस्यैवासमवायिकारणत्वात् पटात्मके कार्ये
तदवयवतन्तुसंयोगस्यैव असमवायिकारणत्वमिति दर्शयति यथा तन्तुसंयो
गः पटस्येति पटात्मकार्येण सह एकस्मिन्नर्थे तन्तौ समवेतत्वात् समवायेन वर्तमाने
सत्यपटात्मककार्यं प्रति तन्तुसंयोगात्मके कारणे असमवायिकारणत्वमित्यर्थः द्वि
तीयमसमवायिकारणं कारणेन सहेत्यादिना कंतदुदाहरति तन्तुरूपेति कार्ये

तिवत्त्वस्य रूपतो ग्राह्याः तद्भिन्नत्वं च मनोविषयत्वे इन्द्रियाणामेव कारणत्वात् ननु ज्ञान
स्य कारणत्वे इह लक्षणे इन्द्रियाभावत्वात् न साधारणं इन्द्रियप्रत्यक्षस्यैव लक्ष्यत्वामि
प्रायेण तत्र लक्षणमाह इन्द्रियार्थसन्निकर्षेति अन्यत्र त्वस्यैव लक्ष्यत्वामिप्राये
णेदं लक्षणं प्रत्यक्षं विभजते निर्विकल्पकमिति प्रकारताशून्यज्ञानत्वमेव निर्विक
७५ ल्पकत्वमित्यर्थः निर्विकल्पे चार्थविषयतास्वीकारे त्रिविधविषयतामध्ये कापि तत्र ना
स्ति अत एव विशेष्यताशून्यज्ञानत्वं संसर्गताशून्यज्ञानत्वमित्यपि लक्षणं संभवति स १
8 प्रकारकमिति विषयतोपधाः ज्ञाननिष्ठापितत्वात् ज्ञानस्य विषयतानिरूपकत्वेन प्र
कारतानिरूपकज्ञानत्वं सविकल्पकस्य ज्ञानस्य लक्षणं उदाहरणाय यथेति इदं त्वावच्छि
न्नविशेष्यतानिरूपिते डित्थत्वप्रकारताशालिज्ञानं इदं त्वावच्छिन्नविशेष्यतानि रूपित
ब्राह्मणत्वप्रकारताशालिज्ञानं च सविकल्पमिति चाक्षुषादिप्रत्यक्षका
रणमतान्यविधानसन्निकर्षं विभजते संयोग इत्यादिना लौकिकविषयतासंबन्धेन च द्रव्यचाक्षुष
क्षुः संयोगस्य कारणत्वं एवं द्रव्यसमवेतचाक्षुषत्वावच्छिन्नं प्रति चक्षुः संयुक्तसम त्वावच्छिन्नं प्र
नवायस्य कारणत्वेन द्रव्यसमवेतसमवेतचाक्षुषत्वावच्छिन्नं च चक्षुः संयुक्तसमवेत ८ ति
समवायस्य कारणत्वं

त्वादसाधारणत्वमत्स्यैवेति अत एव तत्र करणत्ववारणाय व्यापारवत्त्वे सतीति करण
लक्षणे विशेषणं दंडव्यापारवत्त्वं च तज्जन्यत्वे सति तज्जन्यजनकत्वं भवति हि
दंडजन्यत्वे सति दंडजन्यघटजनकता भ्रम्यादेस्तेन भ्रम्यादेर्दंडव्यापारत्वं एवं कपाल
संयोगतंतुसंयोगादेरपि कपालतंतुव्यापारत्वं कपालतंतुजन्यत्वे सति तज्जन्यघट
पटजनकत्वात् करणलक्षणे असाधारणविशेषणानुपादाने ईश्वरादृष्टादावपि व्यापा
रवत्त्वेपि कारणत्वस्य सत्त्वात् तत्रातिव्याप्तिवारणाय असाधारणेति विशेषणं दीपनयद
यत्प्रमाणस्य लक्षणमाह तत्र इति प्रमाणमनेकप्रत्यक्षात्मकज्ञाने नानुपादिष
द्विधप्रत्यक्षस्य तत्प्रति करणव्यापारवत्साधारणकारणं इंद्रियमिति अतः प्रत्यक्षज्ञा
नकरणत्वं प्रत्यक्षस्य लक्षणं अत्र सन्निकर्षातिरिक्तं च विधसंनिकर्षाणां समवाय
भावा४ त४ घटितेन इंद्रियजन्यत्वेन व्यापारत्वेन संभवतीति इंद्रियमनःसंयोगस्यैव षड्विधप्रत्य
क्षजननीये इंद्रियस्य व्यापारता वाच्या प्रत्यक्षप्रमाणलक्षणमुक्त्वा प्रत्यक्षप्रमालक्षण
माह ज्ञानाकरणकमिति अत्र ... प्रत्यक्षप्रमालक्षणे व्याप्तिज्ञा
नेमाहस्यप ज्ञानं पदज्ञानं च तत्रैव करणं ये वा ते ज्ञानकरणकाः अनुमित्युपमि

प्रत्यक्षे संयुक्तविशेषणताऽऽध्यसंनैतादिकेणकाभावप्रत्यक्षे गो इंद्रियसंयुक्तसमवेत
विशेषणता ऽध्यसमवेतसमवेताऽधिकरणकाभावप्रत्यक्षे इंद्रियसंयुक्तसमवेतसमवेत
विशेषणता यथा घटाधिकरणकपटाभावप्रत्यक्षे संयुक्तविशेषणता एवं घटरूपाधिकरण
करसाभावप्रत्यक्षे संयुक्तसमवेतविशेषणता एवं रूपत्वाधिकरणक [illegible] रूपत्वरसत्वस्य
रसघटपटाद्यभावप्रत्यक्षे संयुक्तसमवेतविशेषणता एवमन्यत्राप्यूह्यम् इति श्रीवागीश
गोवर्द्धनमहाचार्यविरचितायां न्यायबोधिन्यां तर्कसंग्रहव्याख्यायां प्रत्यक्षपरि
९ च्छेदः अनुमितेर्व्याप्तिज्ञानं करणं परामर्शो व्यापारः अनुमितिः कार्यमित्यर्थः परामर्शस्य
व्याप्तिज्ञानजन्यत्वात् व्याप्तिज्ञानजन्यानुमितिजनकत्वात् तज्जन्यत्वे सति तज्जन्य
जनकत्वं हि व्यापारलक्षणमुपपन्नं अनुमितिकरणं अनुमानं स्यात् लक्षणं अनुमा-
नं व्याप्तिज्ञानं परामर्शजन्यमिति परामर्शजन्यत्वविशिष्टज्ञानत्वं अनुमितेर्लक्षण
न तु ज्ञानत्वमात्रोपादाने प्रत्यक्षादावतिव्याप्ति [illegible] रन् तद्वारणाय परामर्शजन्यत्वे
सतीति विशेषणं परामर्शजन्यत्वमात्रोक्तौ तद्ध्वंसेऽतिव्याप्तिः अतः ज्ञानत्वोपादाने व्याप्तिविशिष्टपक्षधर्म

ध

गस्यकारणत्वं एवं द्रव्यसमवेतावेिषयकत्वाभावप्रयोजकत्वेन वक्तव्यं

चाक्षुषत्वावच्छिन्नं प्रति द्रव्यग्राहकाणि इंद्रियाणि चक्षुस्त्वङ्मनांसि
त्रीण्येव अन्यानि घ्राणरसनश्रवणानि गुणग्राहकाणि अतः त्वगिंद्रियस्या
लौकिकविषयतासंबंधेन द्रव्यविषयकत्वावच्छिन्नप्रत्यक्षे त्वक्संयोगसमवा
त्वं ४ यस्य हेतुत्वं एवं द्रव्यसमवेतसमवेतस्पर्शत्वादिप्रत्यक्षे त्वक्सं
युक्तसमवेतसमवायस्य हेतुत्वं एवं आत्मोपमानप्रत्यक्षे मनःसंयोगस्य
हेतुता आत्मसमवेतसुखादिमानसे मनःसंयुक्तसमवायस्य हेतुता आत्मस
मवेतसुखत्वादिमानसे मनःसंयुक्तसमवेतसमवायस्य हेतुता रसनघ्राणयोस्तु
न ४ रसगंधतद्गतजातिग्राहकत्वे द्वितीयतृतीयौ सन्निकर्षौ एव तद्धेतुता वा श्राव
णेंद्रियस्य आकाशरूपत्वेन शब्दस्याकाशगुणत्वेन च श्रवणेंद्रिये शब्दस्य सम
वायसन्निकर्षः शब्दवृत्तिशब्दत्वगत्वघत्वादिजातिश्रावणप्रत्यक्षे समवेतसमवायस्य
हेतुता अभावप्रत्यक्षे विशेषणताविशेष्यभावो नाम विशेषणताविशेष्यता च सन्निकर्षः षं
नविधसन्निकर्षघटितविशेषणताविशेष्यता प्रयोजनीयतया द्रव्यादिकारणकामा

लक्षं

वत्पदमहिम्ना धूमव्यापकत्वं त[illegible]दौ सामानाधिकरण्यसंबन्धेन च धूमव्यापक
वह्निसामानाधिकरण्यं व्याप्तिरित्यर्थः वह्नौ धूमव्यापकत्वं नामक्षतं सामानाधि
करण्यात्मं तन्नाभावप्रतियोगिताऽनवच्छेदकधर्मवत्त्वं तादृशधर्मे [illegible] द्रौ वह्नित्वं तथा
हि धूमाधिकरणपर्वतमहानसादौ वर्त्तमानो योऽभावः घटत्वावच्छिन्नप्रतियोगि
ताकाभावः न तु वह्नित्वावच्छिन्नप्रतियोगिता[illegible]काऽभावः कुतः पर्वतादौ व
ह्नेः सत्वात् एवं सति धूमाधिकरणे पर्वतादौ वर्त्तमानस्य घटाऽभावस्य प्रतियोगिता
ऽवच्छेदकं घटत्वं पटत्वमनवच्छेदकं वह्नित्वं तद्वत्त्वम् [illegible] व्यापकत्वं वह्नौ वर्त्तते इयं
च व्याप्तिः सिद्धान्तानुसारेण पर्वतेषु न हि ना व्याप्तिः [illegible] साध्याभाववदवृत्तित्वं साध्यताऽवच्छे
दकसंबंधावच्छिन्नसाध्यतावच्छेदकाऽवच्छिन्नप्रतियोगिताऽवच्छेदकसंबंधावच्छिन्न
प्रतियोगितावच्छेदकाऽवच्छिन्नसंबंधाधिकरण्याऽवच्छिन्नाभावप्रतियोगिताकाऽवच्छेद
कसंबंधावच्छिन्नवृत्तित्वं तादृशवृत्तित्वत्वाऽवच्छिन्नप्रतियोगिताकाऽभावो व्याप्तिः तच्चके
वलान्वयिन्यव्याप्तमिति सिद्धान्तानुसारेण इदं च स्वार्थानुमाने नामन्यायाप्रयोज्यानुमा
10 नं परार्थानुमानं च न्यायप्रयोज्यानुमानं न्यायत्वं च प्रतिज्ञादियं वाक्यसमुदायत्वं [illegible]वत्वं १०

प्रा० टीका कद्द

ताज्ञानं परामर्शो व्याप्तिविशिष्टं च तत्र तद्धर्मताज्ञानं चेति कर्मधारयात् विशिष्टपदस्य
प्रकारतापरत्वात् पक्षधर्मताज्ञानमित्यत्र षष्ठ्याः विषयत्वबोधनात् धर्मतापदस्य
संबंधा [illegible] र्थकत्वाच्च कर्मधारयसमासेन समस्यमानपदयोः
स्वभेदसंसर्गलाभेन च व्याप्तिप्रकारकपक्षसंबंधविषयकज्ञानं तत्परामर्श
इति लभ्यते एवं सति धूमो वह्निव्याप्यः पर्वतानुपर्वत इति समूहालंबनेऽपि परामर्श
लक्षणगमनं तद्वारणाय पक्षविशेष्यतानिरूपिताह तु प्रकारता तन्निरूपिता या
व्याप्तिस्तत्प्रकारतागतव्याप्तिज्ञानं परामर्श इति निष्कर्षः एताह शपरामर्शजन्य
त्वे सति ज्ञानत्वं अनुमितेर्लक्षणं अनुमितिपरामर्शयो विशिष्यकार्यकारणभाव
१२ श्चेत्थं पर्वतत्वावच्छिन्नविशेष्यतानिरूपित [illegible] संयोगसं
बंधावच्छिन्नवह्नित्वावच्छिन्नविधेयकानुमितित्वावच्छिन्नं प्रति वह्निव्याप्तिप्रका
रतानिरूपितातायाः धूमत्वावच्छिन्नप्रकारतानिरूपिता या पर्वतत्वावच्छिन्नवि
शेष्यता तच्छालित्वेन निर्णयं कारणमिति तत्र तन्निर्णयः वह्निव्याप्यधूमवान् पर्वत इत्याका
रकः पक्षपदेति पक्षपदस्वीसाधनात् धूमाधिकरणापावृत्तिवह्निमत्त्व तामान्तू या

काशित्वं केवलान्वयित्वं न चैवं संयोगाभावाकाशाभावो च अव्याप्तिरिति
वाच्यं स्ववृत्ति विरोधिमदत्यन्ताभावप्रतियोगित्वस्य तदर्थत्वात् एकजा
तीयसंबंधेन सर्वत्र विद्यमानत्वं केवलान्वयित्वमिति वा अत्र न व्याप्तिभू
न्यत्वे सति व्यतिरेकव्याप्तिमत्वं केवलव्यतिरेकित्वं यथा पृथ्वी इतरेभ्यो वी४
१ भिद्यते इति अत्र पृथ्वीत्वावच्छिन्नः पक्षः पृथ्वीतरजलादिप्रभेदः साध्यं
गंधवत्वं हेतुः अत्र यद्गंधवत् तदितरभिन्नं इत्यन्वयदृष्टान्ताभावात्
गंधव्यापकेतरभेदसामानाधिकरण्यरूपान्वयव्याप्तिग्रहासंभवः किंतु पृथ्वीतरभेदाभावा वीतरे
भावेऽपि यत्र जलादिकमिति व्यतिरेकदृष्टान्ते जलादौ इतरभेदाभावव्यापकीभूताभा ना
वव्यापकताऽगंधाभावे गृह्यते इत्युभयमेवार्थं मनसि निधाय यैः तु इतरेभ्यो भिद्यते दि४
न तद् गंधवत् यथा जलमिति प्रयोगेण तत्कारेण व्यतिरेकव्याप्तिमेव ग्राहयति पुरि
तवान् एवंप्रकारेण व्यतिरेकव्याप्तिग्रहानंतरं इतरभेदाभावव्यापकीभूताभा
वप्रतियोगिगंधवतीयं पृथिवीत्याकारकव्यतिरेकिपरामर्शात् पृथिवीत्वावच्छिन्नोद्दे ११

यवति त्वाद्यन्यतमत्वं अत्र येन निव्यापकसामानाधिकरण्यरूपव्याप्ति [illegible]
मानित्यर्थः व्यतिरेकेणेति व्यतिरेकोऽभावः तथा च साध्याभावहेत्वभावयोर्व्याप्तिर्व्यति
रेकव्याप्तिः अयं च पक्षत्रयं वह्न्यभाववत्त्वं तत्र धूमाभावेऽपि तत्र यद्विसपाद्य धूमाभाववत्ति ६२
धूमाभावप्रतियोगित्वं तदस्य व्यापकत्वं परं तथा धूमाभावे वह्न्यभावव्यापकत्वं तद्धि वह्न्य
भावव्यापकत्वस्य स्वाश्रयीभूतवह्न्यभावव्यापकीभूताभावप्रतियोगित्व संबंधेन धूमनि
रूपितापरम्परालात्व्यतिरेकव्याप्तिरिति व्यतिरेकित्वेन धूमव्यापकवह्निसामानाधिकरण्यरू
पान्वयव्याप्तिमत्त्वेन अन्वयित्वेन चरीपते व्यतिरेकिपरामर्शाकारश्च वह्न्यभावव्याप
कताभावप्रतियोगिधूमवान् पर्वत इत्याकारकव्यतिरेकव्याप्तिशून्यत्वे सति अन्व
यव्याप्तिमत्त्वं केवलान्वयित्वं साध्ये केवलान्वयित्वं अभावाप्रतियोगित्वम् न
त्वाद्य अभावाप्रतियोगिसाध्यकत्वं केवलान्वयिहेतोर्लक्षणं एतल्लक्षणं हेतो
र्व्यतिरेकित्वेऽपि संगते साध्ये केवलान्वयित्वादेव व्यतिरेकव्याप्तेरभावात् अन्वय
मात्रव्याप्तिकं केवलान्वयीति मूलकारोक्तलक्षणमुपपन्नं अत्यंताभावप्रति

न्या०बो० ह्निमान् प्रमेयत्वादित्यत्र प्रमेयत्वे हेतौ वह्न्यभाववद्वृत्तित्वरूपव्यभिचारज्ञाने वह्न्यभा सातेर
१२ ववद्वृत्तित्वरूपव्याप्तिज्ञानप्रतिबंधः फलं असाधारणमिति सर्वसपक्षविपक्षव्यावृत्तत्वे तर
निश्चितसाध्यवद्वृत्तित्वे साध्यासमानाधिकरण्ये हेतौ साध्यसामानाधिकरण्य
निश्चिते साध्यसामानाधिकरण्यरूपव्याप्तिज्ञानप्रतिबंधः फलं अनुपसंहारित्वं
त्तहमति अन्वयेति उभयत्र दृष्टान्ताभावात् अन्वयव्याप्तिज्ञानव्यतिरेकव्याप्तिज्ञा
नोभयसामग्री नास्तीत्यर्थः सर्वस्यैव पक्षत्वात् पक्षातिरिक्ताप्रसिद्धेरिति भावः वि
12 रुद्धत्वं यथा साध्याभावव्याप्त इति तथा च पक्षविशेष्यकसाध्याभावव्याप्यहेतु
प्रकारकज्ञानात् पक्षविशेष्यकसाध्यप्रकारानुमितिप्रतिबंधः फलं एवं सत्प्र
तिपक्षेऽपि विरुद्धप्रतिपक्षयोर्विशेषमाह विरुद्धहेतोरेकत्वेन प्रतिपक्षे हेतोर्द्वि
त्वेनुसन्धातव्यः सत्प्रतिपक्षे द्वौ हेतू विरुद्धे च एको हेतुरिति यावत् साध्याभावसाध राम०
को हेतुः साध्यसाधकत्वेनोपन्यस्ततद्धेतुसामर्थ्यं सूचयन्नपि भवति आश्रया
सिद्ध इति पक्षताविशिष्टपक्षासिद्धिर्यथा गगनीयत्वविशिष्टारविंदाप्रसिद्धेः १२

यत्रानिरूपितं तत्र भेदावच्छिन्नविधेयताका पृथिवीतरभेदवतीत्याकाराऽनुमि
तिर्जायते इति तत्त्वं संदिग्धसाध्यमिति साध्यप्रकारकसंदेहविशेष्यकं स्वपक्षत्वे
त्यस्यानुमितेः एवं साध्यसंदेहो नियमेन यत्रे जायते इत्यभिप्रायेण इदं लक्षणं प्राचो
नैरुक्तं गगनविशेष्यकमेघप्रकारकसंदेहाभावदशायामपि गृहमध्यस्थपुरुषस्य
रेक्ता घनगर्जितश्रवणेन गगनं मेघवदित्याकारानुमितिर्जायते गगनत्वावच्छिन्नोद्देश्यता
निरूपितमेघत्वावच्छिन्नविधेयताकानुमितिदर्शनात् नवीनैरनुमित्युद्देश्यत्वं पक्ष[illegible] वं
मित्युक्तं निश्चितसाध्यमिति साध्यप्रकारकनिश्चयविशेष्यत्वं सपक्षत्वम् निश्चित
साध्याभाववान्विपक्ष इति साध्याभावप्रकारकनिश्चयविशेष्यं सद्धेतुं निरू वात्वं विप
प्य हेत्वाभासान्निरूपयति हेतुवदाभासंत इति हेत्वाभासाः दुष्टहेतव इत्यर्थः क्षत्वं ४
दोषाः सव्यभिचारविरोधिसत्प्रतिपक्षासिद्धबाधिताः एते दोषाः हेतवोऽनुप
लक्षणवन्तः हेतौ दोषज्ञाने सति अनुमितिप्रतिबन्धो जायते व्याप्तिज्ञानं प्रतिबन्धो वा भवति
अतो वादिनिग्रहार्थं वादिनोद्भावित हेतौ दोषोद्भावनार्थं दुष्टहेतुनिरूपणमित्यर्थः व

१३ संज्ञासंज्ञेती संज्ञा नाम पदं संज्ञी त्वर्थं तयोः संबंधः शक्तिः तयोश्च पदार्थज्ञानमुपमितिरित्यर्थः उपमा
ने अतिदेशवाक्यज्ञानं अतिदेशवाक्यार्थस्मरणं व्यापारकं ज्ञानं जायते तदेव करणं इत्याकारकवा
क्यात् गोसदृशत्वावच्छिन्नविशेष्यकगवयपदवाच्य इत्युपमापरिच्छेदः समाप्तः आप्तेति पदज्ञानं
करणं चेत्याह समहकात् पदज्ञानजन्यपदार्थोपस्थितिर्व्यापारः वाक्यार्थज्ञानं शाब्दबोधः वृत्तिर्नी
म शक्तिलक्षणान्यतररूपा शक्तिर्नाम घटादिविशेष्यकघटादिपदजन्यबोधविषयत्वप्रकारके।
श्वरसंकेत इश्वरसंकेतो नाम इत्याकारकेच्छा सैव शक्तिरित्यर्थः शक्तिनिरूपकत्वं च पदे शक्तित्ववि
विषयतासंबंधेन शक्त्याश्रयत्वं शक्यत्वं शक्यसंबंधो हि लक्षणा सा च द्विधा गौणी शुद्धा चे
13 ति गौणी नाम सादृश्यविशिष्टलक्षणा यथा सिंहो माणवकः इत्यादौ सिंहसादृश्यविशिष्टल
क्षणा शुद्धापि द्विधा जहल्लक्षणा अजहल्लक्षणा चेति लक्षणतावच्छेदकरूपेण लक्ष्यमात्रबोधप्रयोजिका सा जहल्ल
क्षणा यथा गंगायां घोषः इति तत्र गंगापद शक्यप्रवाहसंबंधस्य तीरे सत्त्वात् तादृशशक्यसंबंधः
रूपलक्षणाज्ञानात् गंगापदात्तीरोपस्थितिर्लक्षणतावच्छेदकरूपेण लक्ष्यशक्योभयबोधप्रयोजिका
अजहल्लक्षणा यथा काकेभ्यो दधि रक्षतामित्यत्र काकपदस्य दध्युपघातके लक्षणा लक्षणता
वच्छेदकं दध्युपघातकत्वं तेन रूपेण दध्युपघातकानां काकश्वबिडालादीनां शक्यलक्षणा सर्वेषां बो
बोधः जहदजहल्लक्षणा वेदांतीनां मते आकांक्षा चेति अव्यवहितोत्तरत्वसंबंधेन यत्पदप्रकारकज्ञा १३
नमात्रेकप्रयुक्तो हि यादृश शाब्दबोधाभाव तादृश शाब्दबोधे तत्पदे तत्पदत्वमाकांक्षा एतादृशाकां

सौरभ्यानुमितिर्न संसंभवति स्वरूपासिद्धिर्नाम पक्षे हेतुत्वाभावः तथा च हेतुत्वाभाववि(शि)
ष्टपक्षज्ञानात् पक्षविशेष्यकहेतुप्रकारकपरामर्शानुत्पत्य सामरामर्शप्रतिबंधः फलं
व्याप्यत्वासिद्ध इति तत्र कृते धूमव्यापकत्वं आर्द्रेंधने गृहीतं चेत् धूमे आर्द्रेंधनसंयोगव्याप्यत्वं
गृहीतं एवं वह्निव्यापकत्वं आर्द्रेंधने गृहीतं चेत् वह्नौ तद्व्याप्यत्वं तदेव व्यभिचारित्वं त
स्याच उपाधिव्यभिचारित्वं साधने गृहीतं चेत् उपाधिभूतार्द्रेंधनसंयोगव्याप्य धूम
न२६ व्यभिचारित्वं गृहीतमेव अनुमा प्रकारश्च पूर्वानुमाहेतुपक्षिकत्वं वह्निर्धूमव्यभिचारी धूमव्या
संयो॥ पकार्द्रेंधनं व्यभिचारित्वात् घटत्वादिवत् यो यः साध्यव्यापकव्यभिचारी स सर्वोपि साध्यव्यभि
चारी एवं प्रकारेण कृतानुमानहेतुभूतपक्षे साध्यव्यभिचारो व्यापकतया दूषकत्वमुपाधेः फ द२४
लं तथा च धूमाभाववद्वृत्तित्वरूपधूमव्यभिचारे गृहीते वह्नौ धूमाभाववद्वृत्तित्वरूपव्याप्ति
ज्ञानप्रतिबंधः फलं यस्येति पक्षे साध्याभावः स बाधः स च प्रमाणान्तरेणेति प्रत्य
क्षप्रमाणेन निश्चितः तथा च सालक्षिकसाध्यबाधनिश्चये जाते साध्यानुमिति प्रतिबंधः
फलं इति तर्कवागीशमहाचार्यगोवर्द्धनविरचितायां न्यायबोधिन्यां अनुमानपरिच्छे
दः ॥ छ ॥ छ श्री। श्रीराम ॥छ॥छ॥ श्रीराम ॥ छ

137

न्या॰बो॰ घटत्वमात्रे नीलघटादौ चापि द्वेषविषयत्वस्य सत्त्वात् तत्रातिव्याप्तिवारणाय इतरद्वेषाधीनेति द्वेषवि-
१५ शेषणं सर्पजन्यदुःखादौ द्वेषमात्रं सर्पे द्वेष इति सर्पे द्वेषस्य सत्त्वे जन्यदुःखजनकद्वेषजन्यत्वात् न
अत्र द्वेषानधीनद्वेषविषयत्वरूपदुःखलक्षणस्य दुःखादौ नातिव्याप्तिः फलेच्छा उपायेच्छां प्रति
कारणं अतः फलेच्छाविषयत्वात् उपायेच्छाविषयकले द्वेषाद्दुःखे द्वेषधर्माधर्मौ निरूपयति विहितेति
वेदविहितत्वं निषिद्धमिति वदनिषिद्धे तत्त्वं सामान्यं निरूपयति नित्यमेकमिति नित्यत्वे सत्यनेकस-
मवेतत्वं जातेर्लक्षणं नित्यत्वविशेषणानुपादाने अनेकसमवेतत्वमात्रोपादाने संयोगादावति-
व्याप्तिः अत्राप्यनेकसमवेतत्वस्य सत्त्वात् अतस्तद्वारणाय नित्यत्वविशेषणं अनेकसमवेत-
15 त्वानुपादाने नित्यत्वमात्रोपादाने आकाशादावतिव्याप्तिस्तद्वारणायानेकसमवेतत्वविशे-
षणं अनेकत्वस्यानुपादाने नित्यत्वविशिष्टसमवेतत्वमात्रोक्तौ आकाशगतैकत्वपरिमाणादौ
जलपरमाणुगतरूपादावतिव्याप्तिः जलपरमाणुगतरूपकाभावेन जलपरमाणुरूपादेः आका-
शगतैकत्वपरिमाणादेर्नित्यत्वात् समवेतत्वाच्च अनेकेति समवेतत्वविशेषणं इति गोवर्द्ध-
र्द्धनमिश्रविरचितायां तर्कसंग्रहव्याख्यायां न्यायबोधिन्यां [illegible] परिच्छेदः समाप्तः श्री राम
हरि ॥ छ ॥ छ ॥ छ ॥ छ ॥ १५

ज्ञाज्ञानं शाब्दं अर्थो बाधो योग्यतेत्यर्थः अग्निना सिंचेदित्यत्र शैत्यकरणत्वस्य जलादिधर्मत्वेनहीबाधादिति
अव्यवधानत्वान्नतादृशवाक्याच्छाब्दबोधः सन्निधिं निरूपयति अमदोच्चारतातिविलंबोच्चा
रितानि वैदिकमिति इदमुपलक्षणं वेदमूलकस्मृत्यादीन्यपि ग्राह्याणि लौकिकमिति
प्रयोगहेतुभूतयथार्थानुभवं निरूप्य अयथार्थानुभवं विभजते संशय इत्यादिना एकेति
एकधर्मावच्छिन्नविशेष्यतानिरूपितभावाभावप्रकारकज्ञानं संशय इत्यर्थः भावद्वयकोटि
कसंशयाप्रसिद्धिः मिथ्याज्ञानमिति अयथार्थज्ञानमित्यर्थः विपर्ययो नाम भ्रम इत्य
र्थः व्याप्यारोपेति तर्कं व्याप्यकस्य च बाधनिश्चयकारणं अन्यथा बाधनिश्चयाभावेऽ
व्यापत्तित्वदोषेण तर्कानुपपत्तेः सुखं निरूपयति अनुकूलेति इतरेच्छानधीनेच्छाविष
यत्वमिति निष्कर्षः यथाश्रुते अनुकूलत्वप्रकारकवेदनाविषयत्वस्य घटानुकूलत्वऽ
त्याकारकज्ञानदशायां अनुकूलत्वप्रकारज्ञानविशेष्यत्वस्य घटादावपि सत्त्वादति
व्याप्तिः अतो निष्कर्षलक्षणमुक्तं भोजनादावतिव्याप्तिवारणाय इतरेच्छानधीनेति इच्छा
विशेषणं सुखेच्छायाः सुखत्वप्रकारकज्ञानमात्रजन्यत्वात् दुःखं निरूपयति
प्रतिकूलेति अत्रापि इतरद्वेषानधीनद्वेषविषयत्वमिति निष्कर्षलक्षणं द्वेषवि